रूपो निग्रहस्थानविशेषः, उत्तरार्हे परोक्ते बुद्धावपि यत्रोत्तराप्रमेये उत्तरं न प्रतिपद्यते तत्र अप्रतिभानिग्रहस्थानम् ।)

अप्रतिरथं, क्ली, (नास्ति प्रतिरथः समः मङ्गलार्थत्वेन यस्य तत् ।) यात्रा । सामवेदः । मङ्गलं । इति भूरिप्रयोगत्रिकाण्डशेषौ ॥ (युद्धार्थयानं । युद्धसमये यात्राकृतमङ्गलं ।
"यद् यात्रा मङ्गलं साम तदप्रतिरथं विदुः" ॥
इति हारावली ।)

अप्रतिरथः, पुं, (नास्ति प्रतिरथः प्रतियोद्धा यस्य सः ।) योद्धा इति भूरिप्रयोगः ॥ तुल्ययोद्धृरहितः । इति पुराणं ॥
("दौष्मन्तिमप्रतिरथं तनयं प्रसूय" ।
इति शाकुन्तले ।
"एतेषां तमसामिवाप्रतिरथैस्तेजोभिः" ।
इति महावीरचरिते ।)

अप्रतिरूपकथा, स्त्री, (नास्ति प्रतिरूपा अनुरूपा कथा यस्यां सा ।) अप्रतिवचना वाक् । अतुल्या कथा । तत्पर्य्यायः । सङ्कनिका २ । इति त्रिकाण्डशेषः ॥

अप्रतिष्ठः, त्रि, अप्रतिष्ठितः । प्रतिष्ठारहितः । नास्ति प्रतिष्ठा यस्येति बहुव्रीहौ ह्रस्वः । यथा । हयशीर्षपञ्चरात्रीयसङ्कर्षणकाण्डे ।
"सर्व्वसूक्तेषु कर्त्तव्या प्रतिष्ठा विधिना बुधैः ।
फलार्थिभिस्त्वप्रतिष्ठं यस्मान्निष्फलमुच्यते" ॥
इति मठादिप्रतिष्ठातत्त्वं ॥
("अप्रतिष्ठे रघुज्येष्ठे का प्रतिष्ठा कुलस्य नः" ।
इति उत्तरचरिते ।)

अप्रतुलं, क्ली, (प्रकृष्टतुलाया अभावः, अव्ययीभावः ।) प्रकृष्टपरिमाणाभावः । अनिर्वृतिरिति लोकप्रसिद्धिः । प्रकृष्टतुलारहिते त्रि । नास्ति प्रकर्षा तुला यस्य धनादेः धनादेर्यस्य वा ॥

अप्रत्ययः, पुं, (प्रति + इन् + भावे अच्, ततोनञ्समासः । नास्ति प्रत्ययः विश्वासो यस्य वा) (सन्देहः । संशयः ।
"बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः" ॥
इति शाकुन्तले ।) प्रत्ययाभावः । अविश्वासः । यथा "दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानां" । इति श्रीशिङ्कनः ।

अप्रत्यक्षः, त्रि, (अक्षमिन्द्रियं प्रतिगतः प्रादिसमासः, न प्रत्यक्षः नञ्समासः ।) प्रत्यक्षशून्यः । इन्द्रियागोचरः । तत्पर्य्यायः । अतीन्द्रियः २ । इत्यमरः । ("किन्तु तस्य बलज्ञोऽहं भ्रातृरूपस्य वैरिणः । अप्रत्यक्षं च मे वीर्य्यं समये तव राघव" ॥)
प्रत्यक्षाभावे क्ली ॥

अप्रधानं, क्ली, (न प्रधानं, नञ्समासः ।) प्राधान्यरहितं । तत्पर्य्यायः । अप्राग्र्यं २ उपसर्ज्जनं ३ । इत्यमरः ॥ वाच्यलिङ्गोऽप्ययं । इति भरतः ॥

अप्रमत्तः, त्रि, (प्र + मद + क्तः, ततोनञ्समासः ।) अवधानविशिष्टः । सावधानः । यथा,—
"पापात् पराजितो दुःखादप्रमत्तो विधेः सतः" ।
इति वोपदेवः ॥

अप्रयोगः, पुं, (प्र + युज् + घञ्, ततो नञ्समासः) प्रयोगाभावः । अनुल्लेखादिः । यथा । "उक्तार्थानामप्रयोगः" । इति दुर्गादासः ॥

अप्रलम्बं, क्ली, (प्र + लम्ब + घञ्, नञ्समासः ।) अविलम्बं । शीघ्रं । इति हलायुधः ॥ तद्वति त्रि । (सत्वरः । विलम्बरहितः । झटिति ।)

अप्रशस्तं, त्रि, (प्र + शन्स् + क्तः, नञ्समासः ।) असत् । अश्रेष्ठं । अविहितं । यथा,—
"अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात्" ।
इति तिथ्यादितत्त्वे पराशरः ॥ (मूत्रपुरीषादिकं ।
"अप्रशस्तन्तु कृत्वाप्सु मासमासीत भक्ष्यभुक्" ।
इति मनुः ।)

अप्रसन्नं, त्रि, (प्र + सद + क्तः, नञ्समासः ।) आविलं । अनच्छं । इति शब्दरत्नावली ॥ अतुष्टं । यथा,—
"त्वयि प्रसन्ने परशर्म्मभिः किं
त्वय्यप्रसन्ने परशर्म्मभिः किं" ।
इति प्राचीनाः ॥ (अतुष्टः । अप्रफुल्लः । विषण्णः । विरक्तः । प्रतिकूलः । "अप्रसन्नमनाः किं नु सदा मां प्रति वत्सलः" । इति रामायणे ।)

अप्रसिद्धं, त्रि, (प्र + सिध् + क्तः, नञ्समासः ।) प्रसिद्धतारहितं । अविख्यातं । यथा,—
"लिङ्गं सामर्थ्यं रूढ़िगतं प्रसिद्धं न त्वप्रसिद्धं" ।
इति तिथ्यादितत्त्वं ॥ ("अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म्म" इति कुमारसम्भवे ।)

अप्रस्तुतं, त्रि, (न प्रस्तुतं नञ्समासः ।) अप्रक्रान्तं । प्रकरणाप्राप्तं । यथा,—"अप्रस्तुतप्रशंसा सा या चैव प्रस्तुताश्रया" ।
इति काव्यप्रकाशः ॥ अप्रशंसितं । प्रपूर्व्वस्तुत्यर्थस्तुधातोः कर्म्मणि क्ते नञ्समासः ॥
"अप्रस्तुतप्रस्तुतयोर्द्दीपकन्तु निगद्यते ।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत्" ॥
इति साहित्यदर्पणे ।)

अप्रस्तुतप्रशंसा, स्त्री, काव्यालङ्कारविशेषः । सा च अप्राकरणिकस्यार्थस्य अभिधानेन प्राकरणिकस्याक्षेपः । तस्या लक्षणं । "अप्रस्तुतप्रशंसा सा या चैव प्रस्तुताश्रया । सा च कार्य्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति" ।
"तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा" ॥
आद्याया उदाहरणं यथा,—
"याताः किन्न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते नो कार्य्यानितरां कृशासि कथयत्येवं सबाष्पे मयि । लज्जामन्थरतारकेण निपतद्धाराश्रुणा चक्षुषा दृष्ट्वा मां हसितेन भाविमरणोत्साहस्त्वया सूचितः" ॥
इति काव्यप्रकाशः ॥ इतरासां उदाहरणानि बाहुल्यान्नोक्तानि ॥

अप्रहतं, त्रि, (न प्रहन्यते स्म, प्र + हन् + क्तः, नञ्समासः ।) अकृष्टभूमिः । खिला भूमिः । इत्यमरः ॥ (वस्त्रभेदः । तल्लक्षणं तथा,—
"ईषद्धौतं नवं श्वेतं सदशं यन्नधारितं ।
निर्णेजकाक्षालितं चाप्रहतं वास उच्यते" ॥
इति ।)

अप्राग्र्यं, त्रि, (प्राग्र्यः प्रधानं नञ्समासः ।) अप्रधानं । इत्यमरः ॥

अप्राचीनं, त्रि, अपुरातनं । नव्यं । प्राचीतरदिग्जातं । प्राग्भवं प्राचीनं ततो नञ्समासः ॥

अप्राप्तः, त्रि, (प्र + आप् + कर्म्मणि क्तः, नञ्समासः ।) अलब्धः । यथा । "अप्राप्तप्रापको विधिः" । इति सङ्क्षेपकौमुदी दुर्गादासश्च ॥ (अनधिगतः ।
"अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः" ।
इति भाषापरिच्छेदे । अनुपस्थितः । अनागतः । न्यूनवयाः । अप्राप्तकालः ।
"उत्कृष्टायाभिरूपाय वराय सदृशाय च ।
अप्राप्तामपि तां तस्मै कन्यां दद्यात् यथाविधि" ॥
इति मनुः ।)

अप्राप्तव्यवहार, पुं, (अप्राप्तः व्यवहारो येन सः, अथवा अप्राप्तः व्यवहारः व्यवहारयोग्यं वयो येन सः ।) व्यवहारानभिज्ञः । अप्राप्तवयस्कः । नावालग् इति आरवी भाषा । यथा,—
"अप्राप्तव्यवहाराणां धनं व्ययविवर्ज्जितं ।
न्यसेयुर्बन्धुमित्रेषु प्रोषितानां तथैव च" ॥
इति दायतत्त्वधृतकात्यायनवचनं ॥ किञ्च ।
"गर्भस्थैः सदृशो ज्ञेयः अष्टमाद्वत्सरात् शिशुः ।
बाल आषोड़शाद्वर्षात् पोगण्डोऽपि निगद्यते ॥
परतो व्यवहारज्ञः स्वतन्त्रः पितरावृते" ॥
इति व्यवहारतत्त्वधृतनारदवचनं ॥

अप्राप्तिः, स्त्री, (प्र + आप् + भावे क्तिन्, नञ्समासः ।) अप्रापणं । अलाभः । तद्वति त्रि । यथा,—
"तदप्राप्तिमहादुःखविलीनाशेषपातका" ।
इति काव्यप्रकाशकारः ॥

अप्राप्यं, त्रि, (प्र + आप् + कर्म्मणि ण्यत्, नञ्समासः ।) अप्रापणीयम् । अप्राप्तव्यं । प्रपूर्व्वादापधातोः कर्म्मणि ये नञ्समासः ॥

अप्रामाणिकः, त्रि, (प्रमाणेन सिद्धः, प्रमाण + ठक् तस्य इकः, नञ्समासः) प्रमाणानभिज्ञः । प्रमाणासिद्धः । प्रामाण्यरहितः । यथा । "अतोऽविभक्तार्जितत्वमात्रेण धनस्य साधारणत्वाभिधानमप्रामाणिकं" । इति दायभागः ॥

अप्रामाण्यं, क्ली, (प्रमाणस्य भावः, प्रमाण + भावे ष्यञ्, नञ्समासः ।) प्रामाण्याभावः । यथा,—
"अप्रामाण्यं जनयति सदा नन्दसूनोर्वियोगः" ।
इति पदाङ्कदूतं ॥

अप्रियं, त्रि, (प्री + कर्त्तरि कः, नञ्समासः ।) अनभीष्टं । अनीप्सितं । अप्रीतिकरं । अहृद्यं । यथा,— [इति पुराणं ॥
"सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियं" ।

अप्रियवचः, क्ली, (अप्रियं अप्रीतिकरं वचः वाक्यं कर्म्मधारयः ।) निष्ठुरवाक्यं । इति पारुष्यशब्दार्थे भरतः ॥

अप्रिया, स्त्री, (न प्रिया न प्रीतिकरी लोकानां, नञ्समासः ।) शृङ्गीमत्स्यः । इति शब्दरत्नावली ॥ (अप्रीतिकरी नारी ।)